International Journal of Sanskrit Research 2021; 7(6): 268-272

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 268-272
© 2021 IJSR
www.anantaajournal.com
Received: 16-09-2021
Accepted: 21-10-2021

**डॉ.कपिलदेव हरेकृष्ण शास्त्री**
सहायक-आचार्य, परंपरागत संस्कृत विभाग, फेकल्टी ओफ आर्टस्, महाराजा सयाजीराव विश्वविद्यालय: वड़ोदरा, गुजरात, भारत

Corresponding Author:
**डॉ.कपिलदेव हरेकृष्ण शास्त्री**
सहायक-आचार्य, परंपरागत संस्कृत विभाग, फेकल्टी ओफ आर्टस्, महाराजा सयाजीराव विश्वविद्यालय: वड़ोदरा, गुजरात, भारत

# वैदिकवाङ्गमये सरस्वती नदी सन्दर्भ विश्लेषणम्

**डॉ.कपिलदेव हरेकृष्ण शास्त्री**

**प्रस्तावना**

सरांसि सन्त्यस्यामि’ति विग्रहेण सरस्वती-शब्द एतन्नाम्नीं नदीमभिधत्ते | ऋग्वेदे पदमिदं वाग्देवीमधित्ते [१] तथा सरस्वतीनाम नदी विशेषञ्चाप्यभिधत्ते | गङ्गा यमुना प्रमुखासु नदीषु विद्यमानासु इयमेव नदी नदीनामुत्तमेति स्तूयते | यथा ऋग्वेदे-

अम्बितमे नदीतमे देवितमे सरस्वति|
अप्रशस्ता इव स्मसि प्रशस्तमिव नस्कृधि|| [२]

मातृभूतानां दिव्यानां नदीनां श्रेष्ठभूते हे सरस्वती ! धनरहितान् अस्मान् धनयुक्तान् कुर्वतु इति मन्त्रार्थः| बहोः कालादेव गङ्गा-यमुने भारतदेशे प्रसिद्धतमे नद्यौ भवतः | अथापि ऋग्वेदे गङ्गाया नाम सकृदेव गृहीतम् (ऋग्वेद.१०.७५.५)यमुना त्रिवारम् (ऋग्वेद.५.५२.१७), सरस्वत्यस्तु अनेकवारमिति सरस्वति गङ्गा-यमुने महिम्ना अतिशेते इति ज्ञायते | हिमगिरिप्रभया सिन्धुर्नाम नदी नैर्ऋतीं दिशं प्रति प्रवहन्ति समुद्रेण सङ्गमं प्राप्नोति | सा च अतिवेगवती ओजोवतीभिः वीचिभिः उपेतेति | यथा-

प्रसुव आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः |
प्र सप्तसप्त त्रेधा हि चक्रमु प्र सृत्वरीणामति सिन्धुरोजसा || [३]

एवं सूक्तान्तरात् तस्याः प्राच्यां दिशि नद्यः काश्चन प्रवहन्तीति ज्ञायते | तथा हि -

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जिकीये शृणुह्या सुषोमया ॥ (४)

मन्त्रस्यास्य व्याख्याता आचार्यसायणेन 'सप्त प्रधान नद्यः' तासाञ्च अवयभूतास्तिस्रः स्तूयन्ते,
हे नद्यः ! मे स्तोमं स्तोस्त्रं आ सचत आसेवध्य्वम् शृणुहि इति तात्पर्यम् । प्रधननद्यस्तु गङ्गा, यमुना,सरस्वती,शुतुद्री,परुष्णी,मरुद्वृधा,आर्जिकीयाश्चेति सप्त । असिक्नी मरुद्वृधाया अवयवभूता । वितस्ता सुषोमा च आर्जिकीयाश्च अवयवभूते । आहुत्य तिस्रो नद्यो अप्रधाना भवन्ति । एतासु शुतुद्री 'सतलज' इति, परुष्णी 'रावी' इति, मरुद्वृधा 'चन्द्रभागा' 'चीनाव' इति च, आर्जिकीया 'वीयासि' इति चाधुना व्यवह्रियमाणा वर्तन्ते ।
असिक्न्या एव रावी- इरावती चेति नामधेयान्तरे । तया सम्मिलिताया मरुद्वृधाया एव सङ्गमादूर्ध्वम् रावी इति नाम । वितस्ताया 'झेलम' इति व्यपदेशः । सुषोमा 'सुवानिति' च कस्याश्चन नद्या नामेति विमर्शकैः उच्यते । अथापि कुत्रैषा प्रावहदिति ज्ञातुं न शक्यते ॥ अत्र उद्दिष्टासु नदीषु सरस्वती आर्जिकीया च काल क्रमेण शुष्के बभूवतुः । प्रधान नदीषु एतासु पञ्चैव शिष्टाः । अतएव यत्रैताः स्रवन्ति स प्रदेशो अधुना 'पंजाब' इति व्यपदेशं भजते । शुतुद्रार्जिकीया च मिलित्वा समुद्रं प्रति प्रवहतामिति प्रतीमः । परुष्णी मरुद्वृधा च संगते च प्रस्रवताम् । असिक्नी वितस्ता च आभ्यां संगमं प्राप्य सिन्धोरवयवौ भूत्वा प्रस्रवतः ।
सिन्धोः पश्चिम भागे कश्चन नद्यः प्रावहन्निति निम्नलिखिताद् मन्त्रादवगम्यते-

तुष्टा मया प्रथमं यातवे सजूः सुतर्त्वा रसया श्वेत्यात्या ।
त्वं सिन्धो कुभया गोमती कमुं मेहत्न्वा सरथं साभिरीयसे ॥ (५)

अस्यार्थो भवति हे सिन्धो ! त्वं सरथमीयसे, समानं रथमारुह्य गच्छसि । अन्याभिः सह समानं रथमारुढा नद्यन्तरैः संगता प्रवहसि, (ऋग्वेद.३.३३.२) क्रमुं गोमतीं च प्रति यातवे यातुं प्रथमं पर्वतादवतीर्णा स्रवसि । अनन्तरं तुष्टामया सज्वा च संगता भवसि । तत ऊर्ध्वं सुसर्त्वा,रसया, श्वेत्या, त्या,कुभया,मेहत्वया च संगता भवसीति । अत्र श्वेति स्वाति, कुम्भेति काबूल, गोमतीति, गोमालिति, कुम्बिति कुमिति च नदीनामत्र निर्दिष्टानां अधुनातनो व्यवहारः । सिन्धोरिमा अवयवभूताः। मरुदवृधा अपि सिन्धोरवयवभूता च वर्तते । यथा सिन्धुस्तथा शुतुद्री आर्जिकीया च समुद्रं प्रत्येवास्रमतामिति मन्त्रेण ज्ञायते । अधुना तु पञ्चनदीभिर्मिलित्वा समुद्र एव प्रदेशो अवस्थितः । एवं शुतुद्रो-आर्जिकीयाश्च सूक्तोक्त संगमः कथं निर्वाह्य इति विमर्शनीयम् । सरस्वती, दृषद्वती,अपाया इति तिस्रो नद्यः 'अम्बाला' इति विदितस्य स्थानस्य अनतिदूरे शिर्मूर्नामकपर्वतेषु उत्पन्ना नैर्ऋतिं दिशं प्रति स्रवन्ति । पृथक् प्रवहन्त्यौ द्रुशवती अपाया च सरस्वत्या संगमं प्राप्य सरस्वती नाम्नैव वहतः । यमर्णवं सिन्धुः प्रविशति तमेवैषा सरस्वत्यपि प्रविशति । किन्तु सिन्धुसरस्वत्योः न कुत्रापि संगमो जातः । ऋग्वेदेन उभयोरपि समुद्रेण पृथक् संगमो बभूवेति निर्णेतव्यम् ।(६).

पुरातन्यां स्थित्यामेवमवस्थितयां कुत इदानीं सरस्वत्याः स्रवः आसमुद्रन्न दृश्यते ? कुतश्च सिन्धुम् अपहाय अन्यासां निम्नगानां समुद्रेण संगमो नोपलभ्यते, इति प्राप्तावसरस्य प्रश्नस्य समाधि परस्ताद् उच्यते । इदानीं सरस्वत्यः प्रवाहः कस्मिन् प्रदेशे उपलब्धः इतिमं विषयमालोचयामः। ब्रह्मावर्त प्रदेशे देवनिर्मितः सरस्वती दृषद्वत्योरन्तरे अवस्थितः आसीदिति मनुना उक्तम्-

सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ (७)

देवनदी सरस्वती दृषद्वती चेत्युक्तत्वादनयोः पावनत्वमत्र सूच्यते | अत एव अनयोरन्तरे देवैर्निर्मितो देशः | ब्रह्मावर्तप्रदेशोऽपि पावनत्वं प्रपेदे इत्युक्तं भवति | सरस्वती गिरिभ्यः स्रवन्ती आस्मुद्रात् प्रवहन्त्यासीदित्युक्तम् | नैर्ऋत्यां दिशं प्रति स्रवन्ती चेयं समुद्रमेव अभ्यगच्छत् | नात्र सन्देहस्य अवकाशः | तस्यां दिशायां समुद्रेण वर्तितव्यम् | ब्रह्मावर्तं सप्तसिन्धु प्रदेशं चाभित चतुर्षु दिग्भागेषु समुद्र आसन्निति ज्ञायते |[८] सूर्यस्य उदयः प्राच्यां विद्यमानात् समुद्राद् उपलभ्यमान आसीत् | तस्यास्तगमनं च प्रतीच्यामुदद्यावुपलब्धमिति ऋचा अवगम्यते | [९]

किञ्च ब्रह्मावर्तप्रदेशस्य प्राच्यां मगधकोसलादि देशानां नाम निर्देश ऋग्वेदे नोपलभ्यते | अम्बाला समीपे प्रवहन्त्योः गङ्गायमुनयोरेव नाम्ना कृतो दृश्यते | तत आग्न्येयां प्राच्यां च स्रवन्त्योरेतयोः स्थितिः कीदृशीति बोद्धुं न शक्यते | अतो ब्रह्मावर्तस्य प्राच्यां समुद्र एवासीदित्यनुमीयते | चतसृष्वपि ककुप्सु समुद्रमेव बभूवुः | कालक्रमेण कासुचन अपगासु तोयक्षरणमल्पमल्पमभूत् | अत एव नादे- रपथा मरुप्रदेशाः संजाताः | उत्तरस्यां साईबेरिया मरुप्रदेश: दक्षिणस्यां राजपूतनाम मरुप्रदेशश्च उद्भूताम्| हिमालयाद् दक्षिणतो प्रवहन्त्यां सरस्वत्याम् दृषद्वत्यामपायां च प्रवाह स्तावानल्पिभूतो यतोः बीकानेर प्रदेशाद् उर्ध्वम् वायव्यां नदीष्वेतासु प्रवाहो विनष्ट एव | अतस्तत्र ततो दक्षिणश्चाति विस्तृतो मरुप्रदेश एव उपलभ्यते, यत्र पूर्व सरस्वती पूर्णप्रवाहावहत् | एवमेव हिमवत् उत्तरतो मरोरुद्भवः | एष विस्तृतो मरुप्रदेशो न केवलं दक्षिणस्यां प्रच्यामपि प्रासरत्, गङ्गायमुनयोः प्रवाहोऽपि किञ्चिदिव अल्पोऽभूत् यतः प्राच्यां समुद्रः शुष्कोऽभूत् | एते नद्यौ पर्याप्त प्रवाहे अवहताम् | अतः अनयोः प्रवाहेण प्राच्यां नदीमातृका एव भूमयः संजाताः |

अनन्तरं मगध मैथिलादिदेशानां उद्भवस्य अवकाशः समजनि | अधुना तु सरस्वती भवानीपुरस्य समीपे सिकतास्वन्तर्भवति | 'करनाला'ख्य स्थालद् उर्ध्वम् पुनराविर्भवति | 'धग्गर' इति नाम्ना प्रसिद्ध नदी पटियाला प्रदेशे 'रसुलेति' नामक स्थाने सरस्वत्या संगच्छते | ऋग्वेदे सरस्वती वेगवती गिरीणां सानुनि भनक्ति इत्युक्तम् | [१०]

यस्मिन् यस्मिन् प्रदेशे सरस्वती निलीना, स प्रदेशो विनशनमित्युच्यते | स प्रदेश पावनो यागचर्याणां युक्तरूप इति प्राचीनग्रन्थेभ्यो अवगम्यते | तथा हि -

दक्षिण तीरे सरस्वत्या विनशनस्य दीक्षेरन् ||[११]
शुक्लपक्ष सप्तम्यां दीक्षविनाषते || [१२]

सरस्वत्या इतरप्रदेशस्य तीरमपि पावनतमम् इति सतां मतमिति 'ऋषयो वै सरस्वत्याम् सत्रमासत' इत्यैतरेय ब्राह्मणादवगम्यते | [१३] यदि सरस्वत्या महिमानमुपस्तर्हि कथं तस्या ऋग्वेदे यमुनाया [१४] अनन्तरं निर्देशः ? अत्र ब्रूमः गङ्गायमुना चेतरवेदेषु वेदाङ्गेषु सुविदिते बभूवतुः | सरस्वत्याः सिकतास्वन्तर्लीनत्वात् दक्षिणप्राच्यो: समुद्रो जलवर्जितौ बभूवतुः | तदानीं नद्योरनयोः कूलंकष प्रवाहोऽजनि | गङ्गायमुने पावन्नत्वं प्रपन्ने | सरस्वत्याः महिमा विशेष: स्मृतिपथादपेतः बभूव | अत एवानयोः सरस्वत्याः पूर्वं निर्देशः | ननु सरस्वती सरयुः सिन्धुरिव तिस्रो नद्य एकस्मिन्नेव मन्त्रे पठिता वर्तन्ते | [१५] सरयुरिति हिमवत् उद्भूय अयोध्याया निकटे प्रवहन्त्या नद्या नाम भवति | यदि सरस्वती नैरुत्यां प्रवहन्ती आसीत्, प्राच्यां च गङ्गायमुनयोः प्रधान भूतयो प्रवहन्त्योर्नाम मुख्यत्वेन ऋङ्मन्त्रे कथं ना पठितं ? कथं वा सरय्वा अत्र सूक्ते निर्देश इति ? अत्रोच्यते -

उत त्वा स आर्या सरयोरिन्द्र पारतः |
अर्णाचित्ररथावधीः || [१६]

मन्त्रेणानेन सरय्वास्तीरे प्रवर्तितः समरो निर्दिश्यते | अत्र सरयोरिति प्रयोग आर्षो अवगन्तव्यः | किञ्च ऋग्वेदस्य (१०.६४.९.) मन्त्रे पठिता सरयुर्गङ्गायमुनयोः प्रतीच्यां प्रवहन्ती नदी, न

त्वेतयोः प्राच्यामधुनोपलभ्यमाना सरित् | अपरञ्च रसया, अनिताभया कुभया च प्रवहन्त्या सरय्वा नामग्रहणं कृतं मन्त्रान्तरे | तद्यथा -

मा वो रसातितभा कुभा कमुर्मा वः सिन्धुर्निरीरमत् |
मा वः परिष्ठात् सरयुः पुरीषिण्यस्मे इत सुम्नमस्तु वः || (१७)

ननु यदि सरस्वती नैर्ऋत्यामेवावहत्, कथं जनाः सरस्वतीमन्तर्वाहिनीं मन्यन्ते ? कथं वा ते प्रयोगे गङ्गायमुनाभ्यां संगता सा प्रवहति | अतएव तत्र संगमप्रदेशस्य व्यपदिशन्ति | अत्र चेदं समाधानम् उच्यते गङ्गायमुनयोर्नाम्ना निर्देशो विरल एव उपलभ्यते ऋग्वेदे इति ज्ञायमाने, अस्य प्रश्नस्य न अवकाशः | प्रतीच्यां दिशि सरस्वती वहतीति प्रमाणे प्राच्यां प्रवहन्ती गङ्गायमुनयोरन्तर्वाहिनीरूपेण संगच्छतेति वचसो वैयर्थमेव आपतति -

सरस्वत्या विनशते दीक्षन्ते || (१८)
सरस्वती नाम प्रत्यक् स्रोताः प्रवहति || (१९)

त्रिवेणीति नाम्ना संगमोऽपि नास्त्येव | प्राचीनेषु ग्रन्थेषु एतन्नामक स्थानस्य निर्देशो नास्त्येव | यदि गङ्गायमुनयोः संगमं वर्णयद्भिः सरस्वत्याः संगमो अवर्णयिष्यत, तर्हि तस्याः संगमो अभविष्यत् | स्वकीये प्रतिमानाटके भासः वदति यत् कैकेयीं, कौशल्यासुमित्रयोर्मध्ये अवस्थातुर्मनर्हां भरतो निरूपयतीति वदन् सा गङ्गायमुनयोर्मध्ये कुनदीव न प्रकशतेति मातरं निन्दति इति वदति |
यदि सरस्वत्याः सङ्गमस्तत्र ववृते, तस्या नामग्रहणम् भरतमुखेन भासकविः कृतवान् स्यात् | तथा च तत्रत्यं वाक्यम्-

मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे |
गङ्गायमुनयोर्मध्ये कुनदिव प्रवेशिता || (२०)

कालिदासेन स्वकीये विक्रमोर्वशीये उर्वशीं विना स्वनिकटमागतां चित्रलेखां गङ्गां विना यमुना न शोभत इति नायकमुखेन वर्णितम् | अत्र गङ्गायमुनयोः संगम एव अभिप्रेतः | सरस्वत्याः नामग्रहणम् अपि न कृतम्, अतः सरस्वत्यस्तत्र अवस्थानम् अनुचितमेव | श्लोकश्चायं नायकमुखेन उच्यते -

न तथा नन्दयति मां सख्या विरहिता त्वया |
संगमो पूर्वदृष्टेव यमुना गङ्गया विना ||(२१)

अस्मिन्नेव नाटके चित्रलेखा उर्वशीं प्रति भाषितं वच उपलभ्यते -

चित्रलेखा, सखि ! एतद् भगवत्या भागिरथ्या यमुना संगमविशेष पावनेषु सलिलेषु अवलोकयत इवात्मानं प्रतिष्ठानस्य शिखाभरणभूतं राजर्षेभवनमुपगते स्वः || (२२)

भागिरथ्या यमुनासंगमविशेष एवात्र प्रस्तुतो न सरस्वत्या अपि | पुष्पकविमानेन सीतालक्ष्मण-सुग्रीवादिभिः सह लङ्कातो-अयोध्यां प्रति निवर्तमानः श्रीरामो जानक्यै भूमौ विमानतो दृश्यमान् नदी पर्वताश्रमविशेषान् निरूपयन् गङ्गायमुनयोः संगमं वर्णयति | यथा हि -

क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी
यष्टिरिवानुविद्धा |
अन्यत्र माला
सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ||
क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवातीव पङ्क्तिः |
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ||
क्वचित्प्रभा चान्द्रमसी तमोभिश्चायाविलीनैः शबलीकृतेव |

अन्यत्र शुभा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः प्रदेशा ||
क्वचिच्च कृष्णोरगभूषणेव भस्मङ्गरागा तनूरीश्वरस्य |
पश्यानवद्याङ्गि ! विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गः || (२३)

अत्र गङ्गाया: पयः शुक्लरूपं, यमुनायाः पयः कृष्णरूपं, उभयोर्मेलनेन काऽपि शोभा विराजत इति कविनात्र वर्ण्यते | असावभिख्या सप्तभिरनुपमाभि: प्रदर्शिता भवति | अत्र सरस्वत्या संगमो नोक्तः | यदि संगमोऽवर्तिष्यत तर्हि सोऽपि-अवर्णयिष्यत | किञ्च शुक्लरूपकृष्णरूपयो: एव युक्तरूपाभि: उपमाभि: वर्णनम् कुर्वन् कविः सरस्वत्यास्तोयस्य रूपमपि यथावद् वर्णितवान् स्यात् |
कविभ्यामाभ्यां सरस्वत्याः अत्राधुनातनै: उद्भाव्यमानपावनत्वयुक्तः संगमः कुतो नाभिवर्णित इति विमर्ष्टव्यम् | प्राच्यां प्रवहन्त्या-अस्याः संगमेऽदसीये का वा प्रतिपत्तिरनयोः कविश्रेष्ठयोः स्यात् ? प्रवर्तमानेत्यभिमानिते अस्मिन् संगमे कविभ्याम् एताभ्यां को वा वर्णयेत् ? अतः सरस्वती नदी नैर्ऋत्यां प्रवहन्ती प्रभूतस्रोतसोऽभावेन सिकतासु निलीना तत्र तत्र प्रकाशं स्रवन्ती विनष्टा एव इति अभ्युपगमनीयम् |

### संदर्भ


1. ऋग्वेदसंहिता-६.६१.१.
2. ऋग्वेदसंहिता-२.४१.१६
3. ऋग्वेदसंहिता-१०.७५.१
4. ऋग्वेदसंहिता-१०.७५.५
5. ऋग्वेदसंहिता-१०.७५.६
6. ऋग्वेदसंहिता-३.३३.१
7. मनुस्मृति.२.१७.
8. ऋग्वेदसंहिता-९.३३.६.
9. ऋग्वेदसंहिता-१०.१३६.५.
10. ऋग्वेदसंहिता-६.६१.२.
11. लाट्यायनश्रौतसूत्रम्.१०.१५९
12. कात्यायनश्रौतसूत्रम्.२४-५.३०
13. ऐतरेय ब्राह्मणम्.२.१९.
14. ऋग्वेदसंहिता-१०.७५.५.
15. ऋग्वेदसंहिता-१०.६४.९
16. ऋग्वेदसंहिता-४.३०.१८.
17. ऋग्वेदसंहिता-५.५३.९.
18. ताण्डयमहाब्राह्मणम्.२५.१०.१.
19. सायणभाष्यभूमिका
20. प्रतिमानाटकम्.३.१६.
21. विक्रमोर्वशीयम्.३.१५.
22. विक्रमोर्वशीयम्.४३.पृष्ठे.
23. रघुवंशमहाकाव्यम्.१३,५४-५७.